व्याकरणप्रयोजनविमर्शः

प्रो.हरेकृष्णमहापात्रः

शोधसारांशः -

व्याकरणाध्ययनस्य नित्यविधित्वेन तस्य प्रयोजनविचारस्य अनपेक्षितत्वेऽपि मन्द-मध्यमाधिकारिणां कृते प्रयोजनचर्चा प्रवर्त्तते । 'अथ शब्दानुशासना'मिति भाष्यकारस्य वचनमेव व्याकरणशास्त्रस्य साक्षात् प्रयोजनम् । अर्थात् शब्दानामनुशासनं नाम साध्वसाधुप्रविभागमेव व्याकरणशास्त्रस्य परमं प्रयोजनम् । प्रयोजनप्रयोजनानि तु रक्षोहादीनि पञ्च पश्चादुपदिष्टानि । तदुक्तं भाष्यकृता -

'कानि पुनः शब्दानुशासनस्य प्रयोजनानि'? इति प्रश्नमुपस्थाप्य उत्तरं प्रस्तुवता - 'रक्षोहालघ्वसन्देहाः प्रयोजनम्' । तत्र रक्षोहादिपदस्य बहुवचनान्तपदत्वेऽपि प्रयोजने पदे कथमेकवचनमिति प्रश्नस्य समाधानपुरस्सरं रक्षोहादीनां प्रत्येकं विमर्शनं प्रबन्धस्यास्य विषयः ।

भारतीयसंस्कृतौ प्रयोजनविचारस्याप्राधान्यम् -

'सा प्रथमा संस्कृतिर्विश्ववारा' इति वेदनिनादप्रणोदिता भारतीया संस्कृतिः स्वां महनीयां परम्परां बिभ्रती विभ्रजते । संस्कृत्यामस्यां त्यागस्यैव महत्त्वं न तु भोगस्य । 'तेन त्यक्तेन भुञ्जीथाः' इत्येव अस्याः आदर्शः । किमपि फलमननुसन्धाय सत्कर्मणि स्वकर्तव्ये शास्त्रबोधितविधाने नैरन्तर्यैण प्रवर्तनमेव अस्याः उपदेशः । अतः - 'कुर्वन्नेवेह कर्माणि जिजीविषेत् शतं समाः' इति वेदस्य समुद्घोषः । भगवद्गीताऽपि-

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।
मा कर्मफलहेतुर्भू र्मा ते सङ्गोऽस्त्वकर्मणि ।। इति

फलहेतुकां प्रवृत्तिमनिन्दत् । अत एव शास्त्रेषु नित्यकर्मणाम् अनुष्ठाने प्रत्यवायः दर्शितोऽपि अनुष्ठाने प्रयोजनं नोक्तम् -

विहितस्याननुष्ठानात् निन्दितस्य च सेवनात् ।
अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छति ।। इति ।

व्याकरणाध्ययनस्य नित्यविधित्वम् -

अतो भारतीयदर्शने नित्यविधेः प्रयोजनविचारो नाद्दतः । 'प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते', इत्यादिवचनं तु लौकिककर्मप्रवर्तनपरमेव । अथवा तत्र अपि शब्दस्य निश्चयार्थकत्वे मन्द एव प्रयोजनमनुद्दिश्य प्रवर्तते। उत्तमाधिकारी तु प्रयोजनविचारमनपेक्ष्यैव स्वकर्तव्ये प्रवर्तते इति तदर्थः । एवं व्याकरणाध्ययनस्य नित्यविधित्वात् महर्षिपाणिनिना तत्र प्रयोजनविचारो नाद्दतः । तदुक्तं भाष्यकृता आगमप्रामाण्यं दर्शयता - आगमः खल्वपि - "ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च" इति । अत्र कारणशब्दः फलवाची, कार्यते कर्मणि प्रवर्त्यते अनेनति व्युत्पत्त्या । अतस्तत्र प्रदीपे व्याख्यातं - निष्कारणो दृष्टकारणमनपेक्ष्य इत्यर्थः । नागेशोऽपि व्याचष्टे - स्वर्गादिफलवाचकः कारणशब्दः । एवञ्च निष्कारण इत्यस्य फलानुसन्धानरहितो नित्य इत्यर्थो लभ्यते इत्याशयः । कारणानपेक्षत्वं फलानपेक्षत्वम् । इति अत्र अध्ययननिष्ठं कारणानपेक्षत्वं विषये आरोप्य निष्कारणो वेद इति प्रयोगः साधितः ।

व्याकरणाध्ययने मन्दमध्यमाधिकारिणोः प्रयोजनविचारः -

एवञ्च भगवान् पाणिनिः व्याकरणाध्ययनस्य नित्यविधित्वेनैव उत्तमाधिकारिप्रवृत्तिसम्भवात् प्रयोजनमनुक्त्वैव **वृद्धिरादैच्** इत्यादिक्रमेण सूत्रयामास । वार्तिककारस्तु शास्त्रपूर्वकप्रयोगे धर्म इति वचनेन मध्यमाधिकारिणः कृते प्रयोजनमभाषत । भगवान् भाष्यकारस्तु मन्दाधिकारिणां स्वर्गापूर्वादिषु

अनाश्वासात् शब्दव्युत्पत्तिलक्षणं साक्षात्प्रयोजनम् - अथ शब्दानुशासन् इति बभाष । तदुक्तं कैयटेन - भाष्यकारो विवरणकारत्वात् व्याकरणस्य साक्षात् - प्रयोजनमाह - अथ शब्दानुशासनम् इति । प्रयोजन-प्रयोजनानि तु रक्षोहादीनि पश्चाद् वक्ष्यन्ते । कैयटवचनं व्याचिख्यासुः नागेश आह - यद्यपि पाणिनिना ब्राह्मणेन निष्कारणः इत्यादि श्रुतेः सन्ध्योपासनादाविव प्रत्यवायपरिहारार्थितयैव उत्तमाधिकारिप्रवृत्तिसंभवात् प्रयोजनं नोक्तम् । वार्तिककृताऽपि शास्त्रपूर्वके प्रयोगे धर्म इत्यनेन मध्यमाधिकारिणः परमं प्रयोजनं दर्शितम् । भगवांस्तु विवरणकारत्वान् मन्दाधिकारिणां प्रवृत्तेः प्ररोचक-प्रयोजन-प्रतिपत्तिप्रवणत्वात् व्यवहितेषु स्वर्गापूर्वादिष्वनाश्वासात् साक्षात्प्रयोजनं शब्दव्युत्पत्तिलक्षणं वदतीत्याह भाष्यकार इति । अत्र शब्दज्ञानरूपे प्रयोजने उक्ते विषयोऽप्युक्त एव । इति ।

शब्दानुशासनस्य परमप्रयोजनत्वम् -

एतेन व्याकरणाध्ययने तदज्ञानजन्यप्रत्यवायपरिहारः प्रथममदृष्टफलम् । शास्त्रपूर्वकप्रयोगे धर्म इति पर्यन्तिकमदृष्टं फलम् । शब्दानामनुशासनं नाम साधुशब्दपरिज्ञानं साक्षात् फलं दृष्टं फलं वा । एतस्य प्रयोजनस्य प्रयोजनानि तु रक्षोहागमलघ्वसन्देहाः । व्याकरणस्य इदमेव साक्षात्प्रयाजनमभिलक्ष्य भर्तृहरिराह-

अथप्रवृत्तितत्त्वानां शब्दा एव निबन्धनम् ।
तत्त्वावबोधः शब्दानां नास्ति व्याकरणादृते ।।

तथाहि अर्थस्य नाम अभिप्रायस्य प्रवृत्तेः - यानि तत्त्वानि ये उपायाः तेषां निबन्धनं मूलं शब्दाः गोघटादयः एव भवन्ति । शब्दं विना अर्थप्रवृत्तिर्न भवति, अतः अर्थप्रवृत्तिः शब्दसापेक्षेति भावः । तेषां च अर्थप्रवृत्तिमूलकानां शब्दानां तत्त्वावबोधः नाम तस्य भावस्तत्त्वं तस्य अवबोधः शब्दानां यथार्थमविकलं वा अवबोधो ज्ञानं व्याकरणं विना असम्भवि । अतः शब्दं विना अस्य जगतः प्रवृत्तिरेव न सम्भवति । तथा हि काव्यादर्शकार आह -

इदमन्धतमः कृत्स्नं जायेत भुवनत्रयम् ।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते ।।

अतः शब्दज्योतिरेव भुवनस्य अप्रवृत्तिरूपमन्धकारं व्युदस्यतीति भावः । अत एव भाष्यकारोऽपि आख्यातोपयोगे इति सूत्रे अयमपि योगः शक्यः अकर्त्तुम् । कथमुपाध्यायात् अधीते इति ? अपक्रामति तस्मात्तदध्ययनम् । यद्यपक्रामति किं नात्यन्ताय अपक्रामति ? सन्दतत्वात् । अथ वा ज्योतिर्वत् ज्ञानानि भवन्ति। इति-शब्दानां शब्दाजन्यज्ञानानां वा ज्योतीरूपत्वं प्रत्यपीपदत् ।

ब्याकरणाध्ययनस्य प्रयोजनप्रयोजनानि

एवं रूपेण शब्दानामनुशासनस्य एव व्याकरणाध्ययनस्य साक्षात् प्रयोजनत्वे तस्य शब्दानुशासनस्य किं प्रयोजनमिति जिज्ञासायां भाष्यकृता कानि पुनः शब्दानुशासनस्य प्रयोजनानि इति प्रश्ने रक्षोहागमलघ्वसन्देहा प्रयोजनम् इति निरणायि । अत एव शब्दत्त्वाविदा विदितवेदितव्येन महर्षिणा पुनः शब्दः प्रयुक्तः संगच्छते । शब्दसाधुत्वरूपव्याकरणप्रयोजनस्य किं पुनः प्रयोजनमिति ? प्रयोजनप्रयोजनमपि पिपृच्छिषया भाष्यकृता व्यवहतोऽयं पुनः शब्दः ।

विशेषमस्य विरुद्धवचनत्वे शङ्का -

कानि पुनः शब्दानुशासनस्य प्रयोजनानि ? इति प्रश्नस्य उत्तरं प्रस्तुवत् भाष्यमुपतिष्ठते - रक्षोहागमलघ्वसन्देहाः प्रयोजनम् इति । अत्रेदं विचारणीयतां दधाति यत् व्याकरणाध्ययनस्य प्रयोजनप्रश्नभूतं यादृशं वाक्यम् अभविष्यत् तादृशमपि उत्तरवाक्यं प्रास्तोष्यत् भाष्यकारः । प्रश्नवाक्ये प्रयोजनानीति बहुवचनान्तं पदं तदुत्तरं तु प्रयोजनमिति एकवचनान्तेन दत्तमस्ति । अयं त्वस्ति अभियुक्तोक्तः पन्थाः यद् विशेष्यवाचकपदाद् यल्लिङ्गसंख्यादिबोधिका विभक्तिः प्रयुज्येत विशेषणपदेनापि तल्लिङ्गसंख्यादिविशिष्टेन भाव्यमिति । तदुक्तम् -

या विशेष्येषु दृश्यन्ते लिङ्गसंख्याविभक्तयः ।
प्रायस्ता एव कर्तव्याः समानार्थे विशेषणे ।। इति ।

अभेदान्वयस्य आकाङ्क्षा -

एतदेव विशदीकुर्वन् अभेदान्वयबोधस्य आकाङ्क्षां गदाधरभट्टाचार्य आह - अभेदश्च प्रातिपदिकार्थे समानविभक्तिकेन स्वाव्यवहितपूर्ववर्तिना च पदेन उपस्थापितस्य संसर्गमर्यादया भासते । तथा हि नीलः घट इत्यत्र स्वं - घटपदं तदुत्तरा विभक्तिः सुविभक्तिः तत्समाना विभक्तिः नीलपदोत्तरसुविभक्तिः इति स्वसमानविभक्तिकं पदं नीलपदं तेन उपस्थापितस्य नीलरूपार्थस्य प्रातिपादिकार्थे घटपदार्थे अभेदः अन्वयः । एवञ्च पूर्वप्रसङ्गे कानि पुनः शब्दानुशासनस्य प्रयोजनानि ? इत्यत्र प्रश्नवाक्ये विशेष्य-विशेषणपदयोः समानविभक्तिकत्वादिकं साधीयः। तद्वदेव समाधानवाक्येऽपि विशेष्य-विशेषणपदाभ्यां समानविभक्तिकाभ्यां भाव्यम् । परन्तु भाष्यकृता तथा न

कृतमिति तस्य किमस्ति तात्पर्यमिति जिज्ञासामहे वयम् ।

विरुद्धलिङ्गविषयक शङ्का परिघटः -

अत्र पुनः पिपृच्छिषा जागर्ति यत् - रक्षोहागमलघ्वसन्देहाः प्रयोजनम् इति भाष्यवाक्ये विशेष्यविशेषणपदयोः विरुद्धवचनविषये एव शङ्का कृता विरुद्धलिङ्गविषये कथं प्रश्नः नोपस्थापितः इति विचिकित्साविषयः । परन्तु परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः इति सूत्रप्रामाण्येन अत्र विरोधपरिहारः सुलभः । तथाहि-द्वन्द्वतत्पुरुषयोः परपदस्येव लिङ्गं स्यादिति तत्सूत्रार्थः । उदाहृतं च कौमुद्यां - मयूरीकुक्टौ इमौ, कुक्कुटमयूर्यौ इमे इति । अत्रापि रक्षा च ऊहश्च आगमश्च लघु च असन्देहश्च इति इतरेतरयोगद्वन्द्वे उत्तरपदस्य असन्देहस्य पुंस्त्वेन समस्तपदस्य पुंस्त्वम् । अत एव विशेषेण अनुशासनबलेन लिङ्गव्यत्यासः न दोषाय ।

फल-व्यापारयो इति कारिकायां समन्वयः -

अतः विशेष्य-विशेषणयोः भिन्नवचनत्वं कथमिति प्रश्नः तदवस्थ एव । तयोः भिन्नवचनकत्वे सामानाधिकरण्यं न सम्भवतीति -

फलव्यापारयो र्धातुराश्रये तु तिङः स्मृताः ।
फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम् ।।

इति कारिकां व्याचक्षाणः धातुना सह स्मृताः इत्यस्य वचनविपरिणामेन अन्वयः इति प्रत्यपादयत् । समानवचनं विनाऽपि अन्वये बाधाभावे तु तत्र विभक्तिविपरिणामादिरूपः प्रयासः व्यर्थ एव अभविष्यत् । अतः प्रसङ्गेऽस्मिन् प्रयोजनपदे एकवचनं किमर्थमिति जिज्ञास्यम् एव ।

वेदाः प्रमाणम्-विचारः -

अत्र पुनः प्रश्नः जागर्ति वेदाः प्रमाणमित्यत्र यथा विशेषणपदे सत्यपि बहुवचनान्तविशेष्यपदविभक्तिविरुद्धे एकवचने तत्र चतुर्षु वेदेषु एकमेव प्रमाणत्वं नाम प्रमितिकरणत्वमिष्टमिति तस्य साधुत्वस्य यथा समाधानं प्रदत्तं तथैव अत्र रक्षादिपञ्चके एकमेव प्रयोजनत्वं वर्तत इति एकवचनस्य संगतिरिति तु भ्रन्तिर्नविधेया । प्रसङ्गात् तत्रत्यं स्थलं विचार्यते-तथा हि विशेष्यविशेषणपदयोः समानवचनकत्वं नियमितं गदाधरभट्टाचार्येण - यत्र विशेष्यवाचकपदोत्तरविभक्तितात्पर्यविषयसंख्याविरूद्धसंख्याया अविवक्षितत्वं तत्रैव समानवचनकत्वनियमः । यथा वेदाः प्रमाणम् इत्यत्र विशेष्यवाचकपदं....एकत्वसंख्या सा च प्रमाणपदेन विवक्षिता इति नात्र समानवचनकत्वनियमः । कथमत्र प्रमाणपदेन एकत्वं विवक्षितम् इति चेत् ? उच्यते- शाब्दप्रमाकरणत्वं शब्दत्वावच्छिन्नं वैदिकसमस्तशब्दनिष्ठमेकमेवेति एकत्वं प्रमाणत्वेऽन्वेति । तेन च एकत्वविशिष्ट-प्रमाणत्ववदभिन्नाः वेदाः इति शाब्दबोधः । चतुर्षु वेदेषु एकमेव प्रमाणत्वमिष्टमिति वेदाः प्रमाणमित्यत्र विशेष्य-विशेषणपदयोः भिन्नविभक्तिकत्वेऽपि न दोषः ।

आगमस्य प्रयोजकत्वम् -

महाभाष्योक्तवचने - रक्षोहागमलघ्वसन्देहाः प्रयोजनम् इत्यत्र रक्षादिषु वर्तमानं प्रयोजनं तु नैकरूपम् । तत्र रक्षादीनां प्रयोजनत्वेऽपि आगमस्य प्रयोजकत्वात् । आगममप्रयोजनं प्रकाशयद् भाष्यं - आगमः खल्वपि **ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च** इति । **प्रधानं षडङ्गेषु व्याकरणम्** । **प्रधाने च कृतो यत्नः फलवान् भवति** । भाष्यमिदं स्पष्टीकुर्वता कैयटेन आगमस्य प्रयोजकस्वरूपं प्रयोजनत्वं

व्याख्यातम् । तथा हि - आगमः प्रयोजकः प्रवर्तको नित्यकर्मतां व्याकरणाध्ययनस्य दर्शयति । प्रयोजयतीति प्रयोजनो बाहुलकात् कर्तरि ल्युट् । अथवा प्रयुज्यते अनेन इति करणे ल्युट् । तेन निष्पन्नः प्रयोजनशब्दः प्रयोजकपरः प्रयोजनः इति पुसिं व्यवहार्यः । अपरस्तु प्रयोजनशब्दो भावे ल्युडन्तः फलवाची प्रयोजनम् इति नपुंसके व्यवहारतां गतः । एतेन आगमस्य प्रयोजकत्वलक्षणं प्रयोजनत्वं पर्यवस्यति । अतो यथा वेदाः प्रमाणमित्यत्र सर्ववेदगतमेकमेव शब्दप्रमाणत्वं निरूप्य एकत्वस्य उपपादनं सम्भवति नात्र तथा । रक्षादिषु फलत्वरूपं प्रयोजनत्वम् आगमे तु प्रयोजकत्वरूपं प्रयोजनत्वम् इति प्रयोजनत्वे सर्वथा एकजातीयरूपैकत्वाभावेन तत्र एकवचनं किमभिप्रायकमिति शङ्का न समाहिता।

शब्दकौस्तुभे भट्टोजिदीक्षितोऽपि प्रयोजनशब्दस्य प्रयोजकपरतां व्याख्यातुकामो बूते - रक्षाप्रभृतीनि फलान्तराण्यपि सन्ति । तथा च भाष्यम् - कानि पुनःशब्दानुशासनस्य प्रयोजनानि ? रक्षोहागमलघ्वसन्देहाः प्रयोजनमिति । अत्र प्रयुज्यते- प्रवर्त्यतेऽनेनेति करणल्युडन्तः प्रयोजयतीति कर्तृव्युत्पत्त्या बाहुलकात् कर्तृल्युडन्तो वा उभयथाऽपि प्रवर्तकविधिपरः पुंल्लिङ्गः प्रयोजनशब्दः एकः । फलपरः क्लीबोऽपरः । अतो यत्र विशेष्यवाचकपदोत्तरविभक्तितात्पर्यविषयसंख्याविरुद्धसंख्यायाः अविवक्षितत्वं तत्र समानवचनकत्वनियम इति गदाधरभट्टाचार्योक्तस्य नियमस्य वेदाः प्रमाणम् इत्यत्र प्रवर्तनेऽपि प्रकृतप्रसङ्गे तद्भिन्नतया नास्ति तन्नियमप्रवर्तनस्य विषयता । अतः अत्र प्रकारान्तरेण एव समाधेयम् ।

अत्र प्रसङ्गतो विशेष्य-विशेषणपदयोः भिन्नवचनकत्वस्य द्वितीयमपि उदाहरणमुपादीयते-

शक्तिर्निपुणताऽलोककाव्यशास्त्राद्यवेक्षणात् ।

काव्यज्ञशिक्षयाऽभ्यास इति हेतुस्तदुद्भवे ।। इति कारिकायां

काव्यप्रकाशे काव्यरचनाया हेतुः प्रदर्शितः । शक्तिः नाम संस्कारविशेषो लोककाव्यशास्त्राद्यवेक्षणजन्या निपुणता व्युत्पत्तिविशेषो यः काव्यं करोति जानाति च तदुपदेशेन काव्यकरणयोजनादौ पौनः पुन्येन प्रवृत्तिरभ्यासः - इति त्रयः समुदिताः हेतुः इति कारिकायाः अर्थः ।

अस्यां व्याख्यायां स्वयमेव उक्तं तेन - त्रयः समुदिताः हेतुः इति । अत्र हेतुपदं कार्योत्पादप्रयोजकताऽवच्छेदकसमुदायत्वावच्छिन्नपरम् । तथा हि अत्र कार्यं - काव्यं तस्य उत्पादो नाम उत्पत्तिः, काव्योत्पत्तिप्रयोजकता च शक्तिनिपुणताभ्यासानां त्रयाणां समुदायेऽस्तीति प्रयोजकताऽवच्छेदकं समुदायत्वं तादृशसमुदायत्वावच्छिन्नसमुदायपरं हेतुपदमिति तादृशसमुदायत्वे एकत्वस्यान्वयः । अतः एकत्वविशिष्टं कार्योत्पत्तिप्रयोजकताऽवच्छेदकसमुदायत्वरूपं यद्धेतुत्वं तद्धर्मवन्तस्त्रय इति वाक्यर्थः । समुदाये एकत्वस्य अन्वयादेव शक्त्यादीनां त्रयाणां तृणारणिमणिन्यायेन हेतुत्वशङ्कानिरासः । तथाहि तृणारणिमणीनां वह्निं प्रति पृथग् पृथगेव हेतुत्वमस्तीति केवलतृणसत्त्वेऽपि केवलारणिसत्त्वेऽपि केवलमणिसत्त्वेऽपि वह्न्युत्पत्तिः दृश्यते, तथा काव्यं प्रति शक्त्यादीनां पृथक् पृथक् हेतुत्वस्वीकारे शक्त्यादिषु एकैकसत्त्वे अपरद्वयाभावेऽपि काव्योत्पत्तिः प्रसज्येत । तच्च अनिष्टम् । अतो हेतुपदे विशेषणे विशेष्यविशेषणपदयोः भिन्नवचनकत्वेऽपि न दोषः । एवमेव ज्यात्याकृतिव्यक्तयः पदार्थः इत्यत्र जात्याकृतिव्यक्तिनिष्ठस्य पदार्थत्वस्य एकत्वं विवक्षितमस्ति । यतो न्यायमते पदवाच्यत्वं जात्याकृतिव्यक्तित्रितयपर्याप्तमस्तीति । विशेष्यपदस्य - जात्याकृति-व्यक्तिपदस्य बहुवचनान्तत्वेऽपि विशेषणपदस्य - पदार्थपदस्य एकवचनान्तत्वं युक्तमेव । एवं पुरुरव आद्रवसौ विश्वेदेवाः इत्यत्र द्वित्वविशिष्टयोरेव पुरुरव आद्रवसोः विश्वेदेवविशेषणत्वं विवक्षितमिति विशेष्यवाचक - विश्वेदेवपदोत्तरवर्तिजम्-विभक्ति-तात्पर्यविषयीभूतबहुत्वसंख्याविरुद्धायाः द्वित्वसंख्याया विवक्षितत्वेन अविवक्षितत्वं नास्तीति न समानवचनकत्वनियमः अपितु द्वित्वसंख्याया विवक्षितत्वेन विशेषणवाचकपुरुरवाद्रवपदोत्तरं द्वित्वबोधकं द्विवचनमेव प्रयुक्तं संगतिमावहति। प्रकृते तु रक्षोहागमलघ्वसन्देह-समुदायनिष्ठमेकमेव प्रयोजनत्वं नास्ति नाऽपि रक्षादिषु वर्तमानं प्रयोजनम् एकजातीयमस्तीति अत्र विशेष्यवाचकरक्षोहागमलघ्वसन्देहपदोत्तर जस् विभक्तितात्पर्यविषयीभूतबहुत्वसंख्याविरुद्धाया एकत्वसंख्याया अविवक्षित्वमेवास्तीति समानवचनकत्वनियमः प्राप्तुवन्नेव वर्तते । अतो भाष्यकृता तस्य परिहारे किं तात्पर्यमिति प्रश्ने समाधीयते-

अत्र प्रयोजनश्च प्रयोजनानि इति एकशेषे प्रयोजनम् इति रूपम् । तथा हि एकशेषप्रकरणे - नपुंसकमनपुंसकेन एकवच्चान्यस्याम् इति सूत्रं वर्तते । अत्र पूर्वसूत्रात् सरूपाणाम् एकशेष एकविभक्तौ इत्यस्मात् एकशेष इति वृद्धो यूना तल्लक्षणश्चेदेव विशेषः इत्यस्माच्च तल्लक्षणश्चेदेव विशेष इति अनुवर्तते । तेन - नपुंसकानपुंसकमात्रकृते विशेषेऽनपुंसकेन सहवचने नपुंसकं शिष्यते, एकवच्चास्य कार्यं भवति अन्यतरस्याम् इति सूत्रार्थः सञ्जायते । उदाहरणं यथा - शुक्लश्च कम्बलः, शुक्ला च बृहतिका, शुक्लं च वस्त्रमिति एकशेषे प्रवृत्ते तदिदं शुक्लम् इति रूपम् । अत्र गुणे शुक्लादयः पुसिं गुणिलिङ्गास्तु तद्वति इति अमरोक्तेः विशेष्यानुसारेण शुक्लशब्दस्य लिङ्गं परिवर्तते । अयञ्च एकवद्भावः नपुंसकस्य अनपुंसकेन सहोक्तौ एव प्रवर्तते । तेन शुक्लं च शुक्लं च शुक्लं च शुक्लानीति एकशेष एव न तु एकवद्भावः । अनेनैव सूत्रेण प्रकृतप्रसङ्गे प्रयोजकवाचिना पुंलिङ्गेन प्रयोजशब्देन फलवाचिनो न पुंसकलिङ्गस्य प्रयोजनशब्दस्य एकशेषविधाने प्रयोजनश्च प्रयोजननानि चेति विग्रहे एकशेषे एकवद्भावे च प्रयोजनम् इत्येव रूपं सिद्ध्यति । एतदेव प्रदर्शितं शब्दकौस्तुभे - अत्र प्रयुज्यते प्रवर्त्यतेऽनेनेति करणल्युडन्तः प्रयोजयतीति कर्तृव्युत्पत्त्या बाहुलकात् कर्तृल्युडन्तौ वा उभयथाऽपि प्रवर्तकविधिपरः पुंलिङ्गः प्रयोजनशब्द एकः । फलपरः क्लीबोऽपरः । उभयोः नपुंसकैकशेषे एकवद्भावस्य वैकल्पिकतया प्रश्ने बहुवचनम् उत्तरे एकवचनं च बोध्यम् । तत्र आगमः प्रवर्तकः । रक्षोहलघ्वसन्देहास्तु फलानीति विवेकः । एवं रूपेण एकवद्भावे कृते सति बहुत्ववत्यपि सूत्रेण अतिदिष्टस्य सुविभक्तिवाच्यस्य एकत्वस्य विद्यमानत्वेन तत्रैव अन्वय इति समाधिः।

रक्षोहागमलघ्वसन्देहाः प्रयोजनम् इति भाष्यप्रतिपादितानि रक्षादीनि समासतो विचार्य असन्देहरूपं प्रयोजनं विस्तारतो विवेचयामः । रक्षा च ऊहश्च आगमश्च लघु च असन्देहश्च इति रक्षोहागमलघ्वसन्देहाः । तत्र प्रथमं प्रयोजनम् रक्षा च वेदरक्षैव ग्राह्या; न तु असाधुभ्यः साधूनां रक्षा इत्याशयेन भाष्यकारो व्याचष्टे रक्षार्थं वेदानामध्येयं व्याकरणम् । रक्षायै इति रक्षार्थम् । अर्थशब्दः प्रयोजनपरः । ननु वेदरक्षार्थं भाष्यकारस्य कथमेतावानाग्रह इति चेत् ? उच्यते - वेदरक्षामेव सर्वं रक्षितं स्यात् । रामायणस्य कश्चित् विषयोऽत्र स्मर्यते - यदा लङ्कायां युद्धारम्भो जातः, प्रतिपक्षिभिः असुरैः सह वानराणां युद्धं प्रवृत्तं तदा मर्यादापुरुषोत्तमो भगवान् रामचन्द्रः सर्वेषु स्वपक्षीयवीरेषु स्निह्यन्नपि हनुमद्विषये एव पिपृच्छिषति । हनुमान् क्व वर्तते ? सः कुशली अस्ति नवेति तस्य भगवतो हनुमद्विषयिण्या जिज्ञासया अन्ये शङ्केरन् यत् समष्टेः भगवतो दृष्टिभेदः किंहेतुकः ? इति । तेषां मनोभावं जानन् भगवान् स्वयमेव ब्रूते -

तस्मिन् जीवति दुर्धर्षे हतमप्यहतं बलम् ।
हनुमति गतप्राणे जीवन्तोऽपि हता वयम् ।। इति ।

एवं यथा केवले हनुमति रक्षिते सति सर्वस्या अपि असुरविरोधिशक्तेः विनाशेन सर्वरक्षा तथा वेदे रक्षिते सर्वस्यां सृष्टौ रक्षितायां वयमेव रक्षिताः भवेम, अस्माकं संस्कृतिः रक्षिता भवेत्; वेदस्यैव सर्वमूलत्वात् । तदुक्तं भर्तृहरिणा -

शब्दस्य परिणामोऽयमित्याम्नायविदो विदुः ।
छन्दोभ्य एव प्रथममेतद् विश्वं व्यवर्तते ।। इति ।

मनुरप्याह -

सर्वेषां तु स नामानि कर्माणि च पृथक् पृथक् ।
वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे ।।

एवञ्च वेदे रक्षिते सर्वशास्त्राणि सुरक्षितानि अवतिष्ठेरन्, तन्मूलकत्वात् सर्वशास्त्राणाम् । शास्त्रेषु परिरक्षितेषु संस्कृतिः परिरक्षिता स्यात् । संस्कृतौ संरक्षितायां वयं सर्वेऽपि संरक्ष्येमहि इति व्याकरणेन वेदरक्षार्थं स्तुत्य एव प्रयासो भाष्यकारस्य ।

व्याकरणेन वेदरक्षा च द्विधा । एकं लोपागमवर्णविकारदीनां ज्ञानेन वेदस्य यथास्वरूपमवस्थापनम् । अपरं वेदार्थावगमेन तदनुष्ठानद्वारा पुरुषार्थसाधनतारूपम् । तदुक्तं प्रदीपे- लोके लोपाद्यदृष्टं वेदे दृष्ट्वा भ्रम्येत् अवैयाकरणः । वैयाकरणस्तु न भ्रमति वेदार्थं चाध्यवस्यति । अत्र भ्रम्येत नाम भ्रमेण पाठान्तरं

कल्पयेदिति व्याख्यातं उद्योते । ननु आचार्यपाठेन तद्वचनादेव भ्रमनिवृतौ कि व्याकरणेन इति चेन्न पाठभ्रंमशङ्कया तेषु अविश्वासात् । एवं सुष्ठूक्तमेतद् वेदरक्षार्थमध्येयं व्याकरणम् इति ।

द्वितीयं प्रयोजनम् - ऊहः, ... अध्याहारस्तर्क ऊहः इति अमरकोषः । अपूर्वोत्प्रेक्षणं तर्कणमिति तत्रैव रामाश्रमीकारः । ऊह वित... इति भ्वादिगणीय आत्मनपदी धातुः । ऊहनमनुमानम् ऊह धातोः धञ् । ऊहधातुः अनुमानार्थकः । तथा हि - पञ्चतन्त्रे -

उदीरितोऽर्थः पशुनाऽपि गृह्यते
हयाश्च नागाश्च वहन्ति चोदिताः ।
अनूक्तमप्यूहति पण्डितो जनः
परेङ्गितज्ञानफला हि बुद्धयः ।।

यथा अनुक्तमदृष्टमपि वा वस्तु अनुमानेन विज्ञायते, तथैव वेदमन्त्रे अनुक्तं लिङ्गम् अनुक्तां च विभक्तिम् ऊहन्ते याज्ञकिाः । तच्च ऊहनं नाम अनुक्तलिङ्गविभक्त्यादेः अनुमानेन संनिवेशनं कर्तुं नार्हति अवैयाकरणः । तदुक्तं भाष्यकृता - ऊह खल्वपि - न सर्वैः लिङ्गैर्नच सर्वाभिः विभक्तिभिः वेदे मन्त्राः निगदिताः । ते च अवश्यं यज्ञगतेन पुरुषेण विपरिणमयितव्याः । तान्न अवैयाकरणः शक्नोति यथायथं विपरिणमयितुम् । तस्मादध्येयं व्याकरणम् । यथा अग्नये त्वा जुष्टं निर्वपामीति अग्निमन्त्रोऽस्ति । तत्र सौर्यं चरुं निर्वपेद् ब्रह्मवर्चसकामः इति ब्रह्मवर्चसकामेन सौर्यचरुप्रदानकाले मन्त्रस्वरूपम् ऊह्यते - सूर्याय त्वा जुष्टं निर्वपामीति । इदञ्च ऊहनं - विपरिणामः नाम तदनुक्तलिङ्गविभक्त्यादिबोधकपदघटितपाठः तदर्थं व्याकरणस्य अस्ति प्रयोजनम् ।

तृतीयः आगमः (प्रयोजकः)-

अयं व्याकरणाध्ययनस्य प्रवर्तकः प्रयोजको वा । तेन अयं प्रयोजनः न तु प्रयोजनम् । आगमशब्दोऽयं विविधेषु स्थलेषु बहुष्वर्थेषु प्रयुक्तो दृश्यते । लतायां पूर्वलूनायां प्रसूनस्यागमः कुतः इत्यत्र उत्तररामचरिते आगमशब्दः आगमनस्य वाचकः । भगवद्गीतायाम्-

मात्रा स्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः ।
आगमापायिनोऽनित्यास्तांतितिक्ष्वस्व भारत ।।
इत्यत्र आगमशब्दः उत्पत्तेर्वाचकः ।

वाक्यपदीये तु -

न चागमादृते धर्मस्तर्केण व्यवतिष्ठते ।
ऋषीणामपि यज्ज्ञानं तदप्यागमपूर्वकम् ।।
शिष्टेभ्य आगमात् सिद्धाः साधवो धर्मसाधनम् ।
अर्थप्रत्यायनाभेदे विपरीतास्त्वसाधवः ।।

इत्यादौ आगमशब्दः अविच्छिन्नपरम्पराप्राप्तं शास्त्रं बोधयति । अत्र प्रकृते तु आगमः श्रुतिवाचकः । आगमो हि व्याकरणाध्ययनस्य प्रयोजकः तदुक्तं कैयटेन - आगमः प्रयोजकः प्रवर्तको नित्यकर्मतां व्याकरणाध्ययनस्य दर्शयति । प्रयोजनशब्देन फलं प्रयोजकश्च उच्यते । प्रदीपमिमं व्याचक्षणो नागेश आह - एतेन नित्यकाम्यता व्याकरणाध्ययनस्येत्युक्तम् । नित्यत्वं च अध्येयज्ञेयपदार्थविशेषणीभूताध्ययन-ज्ञानयोर्बोध्यम्। अत्र ब्राह्मणेन इत्युक्ते अन्यस्य एवमध्ययनं काम्यमेवेति सूचयतीति कश्चित् ।

एवञ्च आगमः खल्पिप - **ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च** इति आगममुपस्थाप्य भाष्यकारः प्रधानं षडङ्गेषु व्याकरणम् । प्रधाने च कृतो यत्नः फलवान् भवति इति व्याकरणाध्ययनस्य वैशिष्ट्यं प्राकाशयत् । गुणानां परस्परसम्बन्धत्वाभावात् प्रधानं षडङ्गेषु व्याकरणम् इत्युक्तेः तात्पर्यं प्रदीपे प्रत्यपादि - पदपदार्थावगमस्य व्याकरणनिमित्तत्वात् तन्मूलत्वाद् वाक्य - वाक्यार्थावसायस्येति भावः अत्र उद्द्योते व्याख्यातम् - एवञ्च वेदार्थज्ञाने व्याकरणं प्रधानं कारणमिति भावः । भाष्ये फलवानित्यत्र फलपदेन वाक्यार्थावगमोपयोगीति बोध्यम् । एवञ्च व्याकरणानध्ययनप्रयुक्तस्य वेदार्थाज्ञानप्रयुक्तस्य च प्रत्यवायस्य परिहारकतया नित्यत्वं बोध्यम् । एवं रूपेण आगमस्य व्याकरणाध्ययने मुख्यं प्रवर्तकत्वं बोध्यम् ।

लघु - इदं शब्दानुशासनस्य तृतीयं प्रयोजनम् । तदुक्तं लघ्वर्थं चाध्येयं व्याकरणम् । ब्राह्मणेन अवश्यं शब्दा ज्ञेयाः इति । न च अन्तरेण व्याकरणं लघुनोपायेन शब्दाः शाक्या ज्ञातुम् । अत्र कैयटो व्याख्याति - लाघवेन शब्दज्ञानमस्य प्रयोजनम् । अध्यापनं ब्रह्मणस्य वृत्तिः । न चाशब्दज्ञमुपश्लिष्यन्ति छात्राः । लाघवं च स्पष्टीकुर्वन् नागेशो व्याचष्टे - लाघवं च प्रतिपदपाठापेक्षया प्रकृत्यादिविभागेन अन्वाख्यानस्य बोध्यम् । अग्रे भाष्ये एव प्रतिपदपाठस्य गौरवं प्रक्रियाप्रयोज्यशब्दज्ञानस्य लाघवं च स्पष्टीकृतम् -

अथैतस्मिन् शब्दोपदेशे सति शब्दानां प्रतिपत्तौ प्रतिपदपाठः कर्तव्यः ? गौरश्वः पुरुषो हस्ती शकुनिर्मृगो ब्रह्मण इत्येवमादयः शब्दाः पठितव्याः ? नेत्याह । अनभ्युपाय एष शब्दानां प्रतिपत्तौ प्रतिपदपाठः । एवं हि श्रूयते -बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दपारायणं प्रोवाच, नान्तं जगाम । बृहस्पतिश्च प्रवक्ता इन्द्रश्च अध्येता, दिव्यं वर्षसहस्रमध्ययनकालो न चान्तं जगाम । किं पुनरद्यत्वे । यः सर्वथा चिरं जीवति वर्षशतं जीवति । चतुर्भिश्च प्रकारैः विद्योपयुक्ता भवति - आगमकालेन, स्वाध्यायकालेन, प्रवचनकालेन व्यवहारकालेन वा प्रवर्त्यम्। येन अल्पेन यत्नेन महतो महतः शब्दौघान् प्रतिपद्येरन् । किं पूनस्तत्र ? उत्सर्गापवादः । कश्चिदुत्सर्गः कर्तव्यः कश्चिदपवादः । कथं जातीयकः पुनरुत्सर्गः कर्तव्यः, कथं जातीयकोऽपवादः ? सामान्येनोत्सर्गः कर्तव्यः। तद्यथा कर्मण्यम् । तस्य विशेषेणापवादः । तद्यथा आतोऽनुपसर्गे कः ।। इति

एवं रूपेण शब्दनुशासनं शास्त्रं लघुभूतेन उपायेन प्रकृतिप्रत्ययविभागादिन्यायेन शब्दोपदेशं कुर्वदास्ते इति व्याकरणाशास्त्राध्ययनस्य प्रयोजनम् ।

असन्देहः -

असन्देहः व्याकरणाध्ययनस्य चतुर्थं प्रयोजनम् । विचिकित्सा तु संशयः सन्देहद्वापरौ च इति अमरकोषः। संपूर्वकात् दिह उपचये इति अदादिगणीयाद् धातोः भावे धञि संदेहनं सदेहः । तर्कसंग्रहे - एकस्मिन् धर्मिणि विरुद्धनानाधर्मवैशिष्ट्यावगाहिज्ञानं संशयः, यथा स्थाणुर्वा पुरुषो वेति । अयं संशयः संन्देहो वा ज्ञानविरोधी । अतः भगवद्गीतायाम्-

श्रद्धावान् लभते ज्ञानं तत्परः संयतेन्द्रियः ।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति ।। इति
ज्ञानप्राप्तेरधिकारिणो निर्द्दिश्य ततोऽग्रे-
अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति ।
नायं लोकोऽस्त्ययज्ञस्य कुतोऽन्यः कुरुसत्तम ।। इत्येवं वदता

संशयात्मा निन्दितः । श्लोकस्यास्य आशयस्तु - अज्ञो नाम पश्वादिवन्मूढः, अश्रद्दधानो नाम शास्त्रज्ञानवत्त्वेऽपि नानावादिनां परस्परविप्रतिपत्तिं दृष्ट्वा न क्वापि विश्वस्तः, अपरस्तु श्रद्धावत्त्वेऽपि संशयात्मा नाम - ममेदं सिद्धि एकं नवेति संदेहाक्रान्तमतिः । एषु त्रिषु तु संशयात्मा अग्रे विशेषतया निन्दितः, सः संशयवत्त्वान्न इहलोके सुखं लभते नाऽपि परलोके उत्तमां गतिमाप्नोतीति । केनोपनिषद्यपि ब्रह्मज्ञानाभावे विनाश उक्तः - इह चेदवेदीदथ सत्यमस्ति नो चेदिहावेदीत् महती विनष्टिः इति । प्रकृते च व्याकरणज्ञानाभावे विनाश उक्तः - इह चेदवेदीदथ सत्यमस्ति नो चेदिहावेदीत् महती विनष्टिः इति । प्रकृते च व्याकरणज्ञानाभावे अयं शब्दः साधुः असाधुर्वेति सन्देहे सति साधुशब्दकर्मकप्रयोगाभावे तत्प्रयोज्यपुण्यस्य अप्राप्त्या कल्मषव्यपायाभावाज्ज्ञानाधिकारित्वाभावात् मोक्षासिद्ध्या विनाश एव । किञ्च व्यवहारेऽपि शब्देषु साध्वसाधुपरिज्ञानभावे शब्दप्रयोगे क्लेशः दुःखञ्च । अतः भाष्यकारः - एकः शब्दः सम्यग् ज्ञातः शास्त्रन्वितः सुप्रयुक्तः स्वर्गेलोके कामधुग् भवतीति अवादीत् । अत्र शब्दप्रयोगपरम्परायां सन्देहस्य अभावार्थं व्याकरणं प्रयोजनवदिति तात्पर्यम् ।

अत्र किञ्चित् विचारणीयम् - अत्र सन्देहाभावरूपो योऽयमसन्देहः तत्र कतमः अभावो ग्राह्यः ? यतो हि अभावः चतुर्भेदात्मकः प्रतिपादितः - शास्त्रेषु प्रागभावः, प्रध्वंसाभावः, अन्योन्याभावः अत्यन्ताभावश्चेति

। यद्यप्यभावानामेष विभागो न्यायदर्शनानुसारी, तथापि नाऽयं वैयाकरणानां विरुद्धः । तथाहि - अव्ययं विभक्ति-समीप-समृद्धि-
व्यृद्ध्यर्थाभावात्ययसंप्रतिशब्दप्रादुर्भावपश्चाद्यथाऽनुपूर्व्ययौगपद्यसादृश्यसंपत्तिसाफल्यान्तवचनेषु इति सूत्रे अर्थाभावपदेन अत्यन्ताभावः अत्ययपदेन च प्रध्वंसाभावो विवक्षित इति टीकाकृतामाशयः । यथा तत्र कौमुद्यां - मक्षिकाणामभावो निर्मक्षिकम्, हिमस्यात्ययो अतिहितम् । अत्ययो ध्वंसः । तत्र च व्याख्यातं बालमनोरमायां अर्थाभावः - अर्थाभावाशब्देन अत्यन्ताभाव एव विवक्षितः । तेन पटस्य प्रागभावः निष्पटमिति न भवतीति भावः । एवमेव नगोऽप्राणिषु अन्यतरस्याम् - इत्यादिषु अन्योन्याभावादयो द्रष्टव्याः ।

भट्टोजिदीक्षितेन असन्देहस्य फलस्य उदाहरणं विशदीकृत्योक्तम् - असन्देहोऽपि प्रयोजनम् । तथाहि - स्थूलपृषती अग्निवारुणीमनडवाहीमालभेत इति श्रूयते । तत्र सन्देहः-कर्मधारयः अयं बहुव्रीहिर्वा । तत्र कर्मधारयपक्षे पृषतीशब्दे मत्वर्थलक्षणया पृषत्वती बिन्दुमती गौरेव अभिधीयते; स्थूलाऽपि सैव बिन्दूनां स्थौल्यं तानवं वा यथा तथाऽस्तु । बहुव्रीहौ तु स्थौल्यं पृषत्स्वेवेति, गौस्तु स्थूला कृशा वेत्यनादरः । तत्र लकाराकारे उदात्तत्वं दृष्ट्वा पूर्वपदप्रकृतिस्वरेण बहुव्रीहिं वैयाकरणो निश्चिनेति । ततश्च निश्चिनोति प्रतिबन्धात् संशयानुत्पादः । स एव असन्देहः।

एवं व्याकरणाध्ययनप्रयोजनस्य सन्देहभावस्य कीदृशाभावरूपत्वमिति प्रकृतप्रश्नं विचारयामः । तत्र सन्देहस्य अभावो न अत्यन्ताभावः; तस्य नित्यत्वेन फलरूपतया प्रतिपादनस्य विरुद्धत्वात् । नित्यसंसर्गाभावत्त्वम् अत्यन्ताभावत्वमिति तल्लक्षणात् । फलं हि कार्यमिति अत्यन्ताभावश्च नित्यः इति कार्यनित्ययोः परस्परविरुद्धत्वेन अत्यन्ताभावः व्याकरणाध्ययनस्य फलं कथं स्यात् । नापि प्रागभावः फलं; तस्य अनादित्वेन जन्यत्वाभावात् फलत्वाभावः अनादिः सान्तः प्रागभाव इति तल्लक्षणात् । नापि अन्योन्याभावः फलम् तस्य नित्यत्वेन प्रयोजनत्वासम्भवाद् अतिप्रसङ्गात् च । तथा हि यदि अन्योन्याभावश्चेद् व्याकरणाध्ययनस्य फलं स्यात् तर्हि लक्षोहादीनां पुनरुपादानं व्यर्थं स्यात् । यतो हि रक्षादयः सन्देहभिन्ना एव । नापि सन्देहध्वंसः फलं स्यात् । असन्देहे प्रध्वंसाधावस्वीकारे तत्र सन्देहोत्पत्तेः आवश्यकतया अजातसन्देहस्य वैयाकरणस्य व्याकरणाध्ययनं निष्फलं स्यात् । किञ्च व्याकरणाध्ययनाय प्रवृत्तो जनः असन्दिहानोऽपि सूत्राण्यधीत्य तं तं साधुप्रयोगं जानानः प्रयुङ्क्ते तत्प्रयोगजन्यपुण्यभाक् च भवति । संशयध्वंसस्य फलत्वे संशयोत्पत्तेः अपरिहार्यतया अजातसन्देहो जनो व्याकरणाध्ययनजन्यं फलमेव न विन्देत । अतः शब्दानुशासनापरपर्यायस्य व्याकरणाध्ययनस्य फलं यः असन्देहः स कस्मिन् अभावे अन्तर्भवेत् इति प्रश्नः विचारविषयः । चतुर्षु प्रागभाव-प्रध्वंसाभावात्यन्ताभावान्योन्याभावेषु असन्देहः कोऽयम् अभाव ? इति प्रश्नः तदवस्थः । अत्र समाधानम् - व्याकरणाध्ययनस्य सन्देह-प्रागभाव एव फलम् । तदुक्तं कैयटेन-सन्देहस्य प्रागभावः अत्र द्रष्टव्यः, न तु प्रध्वंसाभावः । नहि वैयाकरणस्य संशय उत्पाद्य विनश्यति, इतरस्यैव तदुत्वादात् इति ।

ननु जन्यमेव वस्तु फलरूपेण व्यवदिश्यते । यथा स्वर्गकामो यजेत इत्यत्र यागेन जायमानं स्वर्गरूपं फलं प्रोच्यते । प्रागभावस्य तु अनादित्वेन जन्यताभावात् कथं फलत्वम् ? इति प्रश्ने उच्यते - न हि स्वरूपेण प्रागभावो नाम सन्देहप्रागभावो नाम सन्देहप्रागभावो फलमपितु तस्य परिपालनमेव व्याकरणाध्ययनस्य फलम् । अत्रापि पुनः कश्चित् सङ्केतोयत् उत्पन्नमेव वस्तु परिरक्ष्यते न तु अनादि । तत् कथं अनादिप्रागभावस्य परिपालनमिति चेत् ? उच्यते - यथा नित्यस्य अनादेः अपि आत्मनः परिपालनाय परिरक्षणाय वा उपदेशः उपलभ्यते । यथा - आत्मनः रक्षति, आत्मानं गोपयीत । नायमात्मा जन्यः तथापि आत्मकर्मकरक्षणस्य कोऽभिप्रायः ? आत्मनः परिपालनं नाम शास्त्रनिषिद्धकर्मजन्यदुरितात् तद् वारणमेव । अयमेव आत्मनः उद्धारः । तथा हि जीवस्तुतौ -

तस्मादहं विगतविक्लव उद्धरिष्य

आत्मनमाशुतमसः सुहृदाऽऽत्मनैव ।
भूयो यथा व्यसनमेतदनेकरन्ध्रं
मा मे भविष्यदुपसादितविष्णुपादः ।।

अस्याशयः - अहं विगतविक्लवो नाम अव्याकुलः सन् सुहृदा आत्मना सारथिरूपया बुद्ध्यैव अनया आत्मानं तमसः संसाराद् उद्धरिष्यामि । यथा एतद् अनेकरन्ध्रं नवद्वारविशिष्टस्थूलदेहलक्षणं व्यसनं विपत्तिः मे मम मा भविष्यत न भविष्यतीति । एवमात्मनो नित्यत्वेऽपि संसारेऽधःपातलक्षणात् क्लेशात् तस्य उद्धार एव तस्य रक्षणमेव सन्देहस्य प्रागभावः परिपालनीयो नाम व्याकरणाध्ययनजन्यसाधुशब्दस्वरूपनिश्चयात्मकज्ञानेन रक्षणीय इति भाष्याशयः । प्रागभावस्य प्रतिपालनं नाम - प्रतियोगिजनककारणविध्वंसनम् । यस्याभावः स प्रतियोगीति नियमात् सन्देहाभावस्य प्रतियोगी सन्देहः । चेत् वैयाकरणस्य सन्देहः स्यात् तर्हि प्रागभावो विनश्येत; प्रागभावस्य प्रतियोगिजन्मनास्यत्वात् । एवं सन्देहाभावस्य प्रतियोगी सन्देहः तस्य जनकं यत्कारणं तस्य विद्वंसनमेव व्याकरणाध्ययनस्य फलम् । इदमेव सन्देहप्रागभावस्य रक्षणम् । तदुक्तं नागेसेन - ननु असन्देहः - सन्देहाभावः । स च नात्यन्ताभावः तस्य नित्यत्वात् । न च ध्वंसः, तत्तद्व्याकरणज्ञानवतः सन्देहस्यैवाभावेन तदसंभवात् । यस्य त्वधीतव्याकरणस्य क्वचित् सन्देहः स तद्विषयकव्यैयाकरणत्वाभाववान्नेव; वेदनार्थे प्रत्ययोऽत आह - प्रागभाव इति । तत् पारिलनञ्च शास्त्राध्ययनफलं न तु स्वरूपं; तस्य अजन्यत्वात् । तत् पालनञ्च प्रतियोगिजनककारणविध्वंसनम्, प्रागभावस्य तत्प्रतियोगिनाश्यत्वाद् इति बोध्यम् । इति ।

व्याकरणाध्ययनेन सन्देहः न नश्यति; अपितु सन्देहजनकं यत्कारणं तत् नश्यतीति सन्देहाभाव एव सदा तिष्ठति । सन्देहजनकं कारणं च शब्दापशब्दसाधर्म्यज्ञानं, व्याकरणाध्ययनेन प्रक्रियाज्ञानेन अपशब्देभ्यो विविच्य नाम पृथक्कृत्य साधूनां शब्दानां ज्ञानेन शब्दापशब्दसाधर्म्यज्ञानरूपस्य सन्देहजनकस्य कारणस्य विनाशात् सन्देहप्रागभावस्तिष्ठति एवेति असन्देहः व्याकरणाध्ययनस्य फलम् ।

ननु नैयायिकैः यथा पटोत्पत्तिं प्रति पटप्रागभावस्य कारणता स्वीक्रियते तथैव व्याकरणाध्ययनस्य सन्देहप्रागभावरूपफलस्वीकारे तत्र सन्देहोत्पत्तिः प्रसज्येत। सन्देहस्य सर्वथा उत्पत्तेः अभावे तत्र प्रागभावस्वरूपहानिरेव स्यात् इति चेत् ? उच्यते-स्वरूपयोग्यतारूपकारणताश्रयवृत्तेः प्रतियोग्युत्पत्तिकारणताशून्यस्य विलक्षणस्यैव प्रागभावस्य अत्र विवक्षणेन अदोषात् । तत्र कणादसूत्रव्याख्यावसरे शङ्करमिश्रैः दुःखाभावरूपं मुक्तिपदार्थं व्याख्यायता इदमेव प्रागभावस्वरूपं समादृतम्-प्रतियोग्यनुत्पादकोऽयं स्वरूपयोग्यतात्मककारणताश्रयवर्ती ज्ञानादिपरिरक्ष्यः प्रागभावविशेष एव दुःखाभावः । ज्ञाने तादृशाभावपरिरक्षकता च तत्प्रतियोगिदुःखोत्पादकव्यापारध्वंसकारणत्वाद् बोध्या ।

ज्ञानिनः दुःखमुत्पद्य न नश्यति अपितु तस्य दुःखोत्पत्तेः यत्कारणम् आसक्तिः, अज्ञानं, देहादौ आत्मबुद्धिर्वा तान्येव नश्यन्ति । अतः कारणाभावादेव कार्याभावः । प्रसङ्गेऽस्मिन् कुमारसम्भवस्य पद्यमेकं स्मर्यते -

विवक्षता दोषमपि च्युतात्मना त्वयैकमीशं प्रति साधु भाषितम् ।
यमामनन्त्यात्मभुवोऽपि कारणं कथं स लक्ष्यप्रभवो भविष्यति ।।

महादेवस्य प्रभवः नाम जन्म कथं लक्ष्येत ? सर्वेषां पितुः ब्रह्मणोऽपि तस्य कारणत्वात् । जन्मनः कारणं पितरौ; तयोरभावात् जन्मैव कथं स्यात् इति भावः । एवं वैयाकरणस्य सन्देहजनककारणस्य शब्दापशब्दसाधर्म्यज्ञानस्यैव अभावात् कुतः सन्देह इति सन्देहाभावः स्थितः फलत्वेन ।

ननु यस्य संशयो जातः व्याकरणाध्ययनेन च नष्टः तस्य तु संशयप्रागभावोऽपि नष्टः ? तस्य च वैयाकरणत्वं न स्यात् इति चेत् ? उच्यते - यथा दैशिकव्याप्तौ कपिसंयोग-कपिसंयोगाभावौ अव्याप्यवृत्ती, कालिकव्याप्तौ, गन्धोऽव्याप्यवृत्तिः, उत्पत्तिकाले घटाद्यभावात् पश्चाद् दर्शनात् । तथैव वैयाकरणत्वं

कालिकाव्याप्यवृत्ति यदा संशयः तदा वैयाकरणत्वाभावः एव यदा प्रयोगविषयकसाधुत्वप्रकारकसंशयाभावस्तदा वैयाकरणत्वम् ।

एतदेव प्रादर्शयत् भाष्यकार समानमीहमानानां चाधीयानानां कश्चिदर्थैर्युज्यते कश्चिन्न युज्यते इति । अतः व्याकरणाध्ययनस्य प्रयोजनं योऽयमसन्देहः स सर्वथा समञ्जस एवेति दिक् ।

सन्दर्भग्रन्थाः

1. ईशावास्योपनिषद् , गीताप्रेस गौरखपुर,
2. उत्तररामचरितम् मोतीलाल बनारसीदास, नई दिल्ली
3. काव्यादर्शः, चौखम्बा सुरभारती ग्रन्थमाला
4. काव्यप्रकाशः, मोतीलाल बनारसीदास, नई दिल्ली
5. कुमारसम्भवम् , सुरभारती प्रकाशन , नई दिल्ली
6. पञ्चतन्त्रम् मोतीलाल बनारसीदास, नई दिल्ली
7. प्रायश्चित्तविवेकः , चौखम्भा विद्याभवन, नई दिल्ली
8. मनुस्मृतिः चौखम्बा सुरभारती ग्रन्थमाला
9. वाक्यपदीयम् , मोतीलाल बनारसीदास, नई दिल्ली
10. वाल्मीकिरामायणम् , गीताप्रेस गौरखपुर,
11. व्याकरणमहाभाष्यम् , चौखम्बा सुरभारती ग्रन्थमाला
12. शब्दकौस्तुभम् , खेमराजपुस्तकालय,मुम्बई
13. श्रीमद्भगवद्गीता , गीताप्रेस गौरखपुर,
14. श्रीमद्भागवतम् , गीताप्रेस गौरखपुर,

प्राचार्यः
राष्ट्रियसंस्कृतसंस्थानम् ,
श्रीसदाशिवपरिसरः, पुरी